National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(65): 201-203
© 2026 NJHSR
www.sanskritarticle.com

**Dr. Dilip Kumar Das**
Classical Teacher,
Town Government Girls High-School Bhawanipatna,
Kalahandi, Odisha, India

**Correspondence:**
**Dr. Dilip Kumar Das**
Classical Teacher,
Town Government Girls High-School Bhawanipatna,
Kalahandi, Odisha, India

# पाणिनीयव्याकरणे परिभाषासूत्रस्य प्राशस्त्यम्

**Dr. Dilip Kumar Das**

**वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम्।**
**पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम्[1]॥**

धर्मार्थकाममोक्षाख्यपुरुषार्थफलप्रधाने कर्मनिबन्धने नानाविधसुखदुःखज्वालामालासमाकुलिते विचित्रेऽस्मिन् जगतीतलेऽतीव दुर्लभं मानवजन्म। मानवजन्म लब्ध्वापि धर्मसाधनमन्तरा न पुरुषार्थसिद्धिः। धर्माधर्मविवेकश्च साङ्गोपाङ्ग-वेदाध्ययनमन्तरेण न भवितुमर्हति। तदुक्तम् भगवता पतञ्जलिना "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च प्रधानश्च षट्स्वङ्गेषु व्याकरणम्। प्रधानो च कृतो यन्त्रः फलवान् भवति[2]। प्रकृतिप्रत्ययविवेचनपुरस्सरं भाषायाः स्वरूपमुपवर्णयत् साध्वसाधुशब्दनिरूपणं च कुर्वत् व्याकरणशास्त्रमितरशास्त्रापेक्षया विदुषामत्यन्तोपकारम्। यतश्च तद्विना शब्दस्य सम्यग्ज्ञानाय सुष्ठु प्रयोगाय च नास्त्यन्यः लघूपायः। अत एवोक्तं भाष्ये "न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्या ज्ञातुम् इति[3]"।

व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृतिप्रत्ययविभागविषयीक्रियन्ते असाधुशब्देभ्यो विविच्य बोध्यन्ते साधु शब्दा अनेनेति व्युत्पत्त्या वि आङ् पूर्वात् डुकृञ करणे इत्यास्माद् धातौः "करणाधिकरणयोश्च[4] " इति पाणिनीयसूत्रेण करणार्थकल्युट्प्रत्यान्तो निष्पद्यतेऽयं "व्याकरण" शब्दः। असाधुशब्दावधिकसाधुशब्दपृथक् कृतकरणत्वम् व्याकरणशास्त्रस्य सामान्यलक्षणम्। अर्थात् व्याक्रियन्ते व्युत्पाद्यन्ते अपशब्देभ्यः साधुशब्दाः पृथक्कृत्य ज्ञायन्त इति व्याकरणपदस्य अभिप्रायः। महाभाष्ये चोक्तं लक्ष्यलक्षणे व्याकरणम्। लक्ष्यं च लक्षणं चेति समुदितं व्याकरणं अभिप्रेतम्॥ शब्दानुशासनम् इति व्याकरणस्याऽन्वर्थ नाम। अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य बोध्यन्ते इत्यनुशासनम्, शब्दानुशासनम्, शब्दानुशासनमिति व्युत्पत्त्या करणार्थकल्युट्प्रत्ययान्तः शब्दानुशासनं शब्दो निष्पद्यते। शास्त्रपदेन समानाधिकरण्याच्छब्दानुशासनं नाम शास्त्रम्, तच्च व्याकरणमेव। अत एव भगवता पतञ्जलिना- "अथ शब्दानुशासनम्[5]" इति व्याकरणस्य साक्षात् प्रयोजनम् अभिहितम्।

## पाणिनिसूत्राणां प्राशस्त्यम्-

पाणिनिना कृतं व्याकरणं तु वैदिकलौकिकोभयोभाषान्वयख्यायकम्। अत एव महाभाष्यप्रारम्भे अथ शब्दानुशासनं केषां शब्दानाम् ? लौकिकानां वैदिकानां च इत्युक्तवता भगवत्पतञ्जलिना पाणिनीयस्य-लौकिकवैदिको भयभाषान्वयख्यायकत्वं प्रकटितम्। पाणिनीयव्याकरणनिर्माणप्रणाली-विवरणव्याजने पूर्वव्याकरणापेक्षया अस्य वैशिष्ट्यमपि प्रकटितं भाष्यकारेण। तथा हि-"उक्तः शब्दः स्वरूपमप्युक्तम्, प्रयोजनान्यप्युक्तानि। शब्दानामनुशासनमिदानीं कर्तव्यम् तत्कथं कर्तव्यम्? किं शब्दोपदेशः कर्तव्यः? आहोस्विदपादेपशब्दोपदेशः आहोस्विदुभयोपदेशः" इति। अन्यतरोपदेशेन कृतं स्यात्। किं पुनरत्र ज्यायः लघत्वाच्छब्दोपदेशः इष्टान्वयख्यानं च भवति। अथ एतस्मिन् शब्दोपदेशे सति किं शब्दानां प्रतिपत्तौ प्रतिपदपाठः कर्तव्यः गौरश्वः पुरुषो हस्ती शकुनिमृगो ब्राह्मण इत्येवमादयशब्दाः पठितव्याः नेत्याह। अनभ्युपाय एष शब्दानां प्रतिपत्तौ प्रतिपदपाठः। एवं हि श्रूयते। बृहस्पतिरिन्द्रायदिव्यं वर्षसहस्त्रं

प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच। नान्तं जगाम। किं पुनरद्यत्वे तस्मादनभ्युपायश्शब्दानां प्रतिपत्तौ प्रतिपदपाठः।

कथं तींमे शब्दाः प्रतिपत्तव्याः ? किञ्चित्सामान्यविशेषवल्लक्षणं कर्तव्यम्, येन अल्पेन यत्नेन महतो महतः शब्दौघान् प्रतिपद्येरन्। किं पुनस्तत्? उत्सर्गापवादौ। कश्चिदुत्सर्गः कर्तव्यः, कश्चिदपवादः। कथं जातीयकः पुनरुत्सर्गः कर्तव्यः? कथं जातीयकोऽपवादः ? सामान्येन उत्सर्गः कर्तव्यः, तद्यथा "कर्मण्यण्[6]" तस्य विशेषण अपवादः तद्यथा- "आतोऽनुपसर्गे कः[7]" इति पस्पशाह्निके भाष्यकारेण उक्तम्। एतेन प्राचीनैराचार्यैः कैश्चित् शब्दोपदेशः। अपशब्दोपदेशश्च कृतः इति। केश्चित् प्रतिपदपाठः कृत इति। केश्चित् उत्सर्गापवाद्भावं विना शब्दानुशासनं कृतमिति च सूचितमिति ऊहितुं शक्यते। पूर्वोक्तसल्लक्षणलक्षितत्वादेव अन्य व्याकरणानि अपहाय पाणिनीयमेव व्याख्यातुं स्वीकृतवान् पतञ्जलिरित्यूहितुं शक्तये। अत एव वृद्धिसूत्रभाष्ये प्रमाणभूत अचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता यत्नेन सूत्राणि प्रणयति स्म। तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुम्। किं पुनरियता सूत्रेण इति। इको यणचि इति सूत्रभाष्ये सामर्थ्ययोगान्न हि किञ्चिदत्र पश्यामि शास्त्रे यदनर्थकं स्यात् इति च उक्तवता। भाष्यकारेण पाणिनिसूत्राणां प्राशस्त्यं प्रकीर्तितम्।

**सूत्रस्य लक्षणम्-**

व्याकरणमहाभाष्ये भगवता पतञ्जलिना सूत्रमेव व्याकरणमिति प्रतिपादितम्। व्याकरणस्य सूत्रमित्यत्र व्याकरणपदेन शास्त्रस्य व्याकृतिक्रियायां करणरूपत्वमुच्यते। "सूचनात् सूत्रमिति सूत्रशब्दस्य व्युत्पत्तिः"। सूत्रत एव शब्दा प्रतिपद्यन्ते, अतः शब्दाप्रतिपत्तिरूपो दोषोऽति नाऽस्ति । अतः सूत्रत एव शब्दानां निष्पत्तिर्भवति। उक्तञ्च सूत्रेष्वेव तत् सर्वं यद् वृत्तौ यच्च वार्तिके व्याकरणशास्त्रे एकलक्षणमुखेनाऽनेकलक्ष्याणां संग्रहः सूत्रद्वारा विधीयते। सूत्रञ्च पाणिनिमुनिना विरचितः अष्टाध्यायी नाम्ना ग्रन्थः। यथा सूत्रलक्षणम्-

**"अल्पाक्षरमसन्दिग्धं सारवद् वि श्वतो मुखम्।**
**अस्तोभमनवद्यञ्च सूत्रं सूत्रविदो विदुः[8]॥**

अर्थात् सूत्रविदो जानान्ति यत् स्वल्पाक्षरयुक्तं सन्देहरहितं सारवद् विस्तृतविवरणकारकं दोषरहितम् अस्तोभं श्रद्धेयं वा पदं सूत्रं भवति। अष्टाध्याय्यां पाणिनिना षड्विधानि सूत्राणि प्रोक्तानि। तथा हि-

**"संज्ञा च परिभाषा च विधिर्नियम एव च।**
**अतिदेशोऽधिकारश्च षड्विधं सूत्रमुच्यते[9] ।।"**

अर्थात् सूत्रं षड्विधम् - संज्ञा-परिभाषा-विधि-नियम-अतिदेशाऽधिकारभेदात्। परिभाषासूत्रस्य स्वरूपम् अनियमे नियमकारित्वं परिभाषासूत्रत्वम्। तदुक्तं भगवता पतअलिना- **"परिभाषा पुनरेकदेशस्था सती सर्व शास्त्रमभिज्वलयति प्रदीपवत्[10]।** परितो भाष्यतेऽनया इति व्युत्पत्या परिभाषा शब्दस्यः व्युत्पन्नः। श्री नागेशभट्टो व्याकरणमहाभाष्ये उद्योतटीकायां वदति-

**"एकदेशस्थिता शास्त्रभवने याति दीपताम्।**
**परितो व्यापृतां भाषां परिभाषां प्रचक्षते[11]।"**

काशिकादिग्रन्थेषु **"अनियमे नियमकारिणी परिभाषा[12]"** इति लक्षणमुपलभ्यते। परिभाषेन्दुशेखर- ग्रन्थस्य विजयाटीकायां श्री पं. जयदेवमिश्रेणोक्तम् विधिशास्त्रप्रवृत्तिनिवृत्त्युपयोगि साधुत्वाप्रकार-कशक्त्याविषयकबोधजनकत्वे सति अधिकारशास्त्रभिन्नत्वं परिभाषात्वम्। श्री पं. सभापतिशर्मोपाध्याययमहाभागा सिद्धान्त-कौमुद्याः लक्ष्मी टीकायां स्वीकुर्वन्ति यत् परिभाषात्वञ्च सङ्केतग्राहकाभिन्नत्वे सति विधिशास्त्रविशिष्टत्वम्। परिभाषा द्विविधा पाणिनिना अष्टाध्याय्यां पठिताः परिभाषाः, अन्यैर्वैयाकरणैः कृताश्च। तादृशानि परिभाषासूत्राणि प्रथम श्रेण्यामागच्छन्ति। यथा आदेः परस्य[13], इको गुणवृद्धी[14] इत्यादि द्वितीयश्रेण्यां परिभाषा-माश्रित्य कृता ग्रन्थाः परिभाषापाठादयो ग्रन्थाः समाविशन्ति। येषां पाणिनीयसूत्राणां यथाकालं यथोद्देशं च सम्पूर्णेऽपि व्याकरणशास्त्रे नियमकारित्वेनोपस्थितिर्भवति,तानि परिभाषासूत्राणीति वैयाकरणा वदन्ति। पाणिनिना अष्टाध्याय्यां प्रायेण पञ्चाशन्मिन्तानि परिभाषासूत्राणि प्रणीतानि। परिभाषाणामिदमेव कार्य भवति यद् व्याकरणशास्त्रे दृष्टस्याऽनियमस्य दूरीकरणम्। यथा "तस्मिन्निति निर्दिष्टे पूर्वस्य[15] तस्मादित्युत्तरस्य[16] प्रभृतीनि परिभाषासूत्राणि।

**परिभाषासूत्रस्य प्राशस्त्यम्-**

व्याकरणशास्त्रे दृश्यमानाऽव्यवस्थानिवारणमेव परिभाषाणां प्रमुख कार्यम्। अनियमितताया अव्यवस्थाया वा भेददृष्ट्या परिभाषा-णामपि विविधानि कार्याणि भवन्ति। अनेकाः परिभाषाः व्याकरणशास्त्रे आवश्यकपदोपस्थितिमुखेन सूत्रार्थं व्यवस्थापयन्ति। यथा- तस्मिन्निति निर्दिष्टे पूर्वस्य[17], तस्मादित्युत्तरस्य[18]", प्रभृतीनि परिभाषासूत्राणि, तथा च प्रत्ययग्रहणे यस्मात्स विहितस्तदा-देस्तदन्तस्य ग्रहणम्, यस्मिन् विधिस्तदादावल्ग्रहणे[19] इत्यादि।

सुधी + उपास्यः इत्यत्र शङ्का भवति यदत्र 'इको यणचि' इति सूत्रेण कस्मिन् अचि परतः कस्य इकः यण् स्यात् ? कथं न सकारोत्तरवर्तिनः उकारस्य यण् भवति, धकारोत्तरवर्तिनि ईकारेऽचि परतः ? अस्यां स्थितौ "तस्मिन्निति निर्दिष्टे पूर्वस्य" इति परिभाषासूत्रं सूत्रार्थ व्यवस्थापयति तेन अव्यवहितपूर्वस्य इकः यण् भवति। अत्र 'उपास्य' इत्यस्य उकारेऽचि परतः तदव्यवहितपूर्वस्य 'सुधी' इत्यस्य 'इकः' यण् भवति। सकारोत्तरवर्तिन उकारस्य न यण् मध्ये धकारस्य व्यवधानात्। "प्रत्ययग्रहणे यस्मात् स विहितः तदादेः तदन्तस्य ग्रहणम्[20] " इति परिभाषा "रदाभ्यां निष्ठातो नः पूर्वस्य च दः[21] " इति सूत्रास्याऽर्थं व्यवस्थापयति। 'तीर्णा' इत्यत्र तकारस्य

नकारो विधीयते, किन्तु 'दृषत्तीर्णा' इत्यत्र धातोस्तकारस्य नकारादेशो न भवति। एवंविधाः परिभाषाः शास्त्रत्वसम्पादिक्यः परिभाषाः 'पदविशेषोपस्थापिका' पदेनाऽपि व्यवहर्तुं युज्यते। 'यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते[22] ' इति परिभाषा 'दाधा ध्वदाप्' इति सूत्रे 'घु' शब्देन घुसंज्ञक दा धातुना सह आगमयुक्तस्य दाधातोर्ग्रहणं कारयति, तेन 'नेर्गदनदः' इत्यादिसूत्रेण 'प्रणिददाति' इतिवत् 'प्रणिदापयति' इत्यत्रापि नस्य णत्वं कारयति। किन्तु अडागमयुक्त 'पा' ग्रहणापत्तौ "निर्दिश्यमानस्याऽदेशा भवन्ति" इति परिभाषया सूत्रे षष्ठ्या निर्दिष्टस्य प्रकृतेरेव आदेशो भवति, तदा 'पा' मात्रस्यैव 'पिब' आदेशोऽभूत् 'अपिबत्' इति प्रयोगः सिद्धः। अत्रेदमेव तात्पर्यमवगन्तव्यम् यत् किञ्चिन्निमित्तीकृत्य कस्यचन विधेर्विधाने आगमविशिष्टस्य ग्रहणं भवति, किन्तु यत्र कस्यचन स्थाने आदेशविधानमिष्टम्, तत्र सूत्रे निर्दिश्यमानस्यैव पदस्याऽदेशो भविष्यति ।

**सन्दर्भाः**

1 सिध्दान्तकौमुदीबालमनोरमा पूर्व 1 ,.1

2 महाभाष्यम् 1.1.1

3 महाभाष्यम् ,पस्पशाह्निकम् पृ 10

4 अष्टाध्यायी 3.3.117

5 महाभाष्यम् 1

6 अष्टाध्यायी 3.2.1

7 अष्टाध्यायी 3.2.3

8 अथ लघुसिद्धान्तकौमुद्याः सरलाटीकायां संज्ञाप्रकरणम् 1

9 लघुसिद्धान्तकौमुदी पृष्ठा09-

10 महाभाष्यम्, 1.1.48

11 हरदत्त पदमञ्जरी 3.3.103

12 महाभाष्यम्2 .1.2

13 अष्टाध्यायी 1.1.54

14 अष्टाध्यायी 1.1.3

15 अष्टाध्यायी 1.1.66

16 अष्टाध्यायी 1.1.67

17 अष्टाध्यायी 1.1.66

18 अष्टाध्यायी 1.1.67

19 परिभाषेन्दशेखरः 33

20 परिभाषेन्दशेखरः 23

21 अष्टाध्यायी 8.2.42

22 परिभाषेन्दुशेखर 11

**ग्रन्थसूची-**

1.परिभाषेन्दुशेखर-पण्डितकालिकाप्रसादशुक्लः, (सम्पा.), सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, वाराणसी, १९९१।

2.महाभाष्यदीपिका - चौखम्बा अमरभारती प्रकाशनम्, वाराणसी, १९९७।

3.महाभाष्यप्रदीपव्याख्या - फ्रेञ्च इन्स्टिट्यूट्, पुदुच्चेरी, १९७३–१९८३।

4.परिभाषेन्दुशेखर - डॉ. पूर्णदत्तसिंहः, इन्दुप्रकाशनम्, वाराणसी, १९८७।

5.संस्कृतव्याकरणस्य इतिहासः- पण्डितयुधिष्ठिरमीमांसकः, रामकपूरट्रस्ट्, बहालगढ (हरियाणा)।

6.वैदिकसाहित्यस्य इतिहासः - चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, २००५।

7.संस्कृतसाहित्यस्य इतिहासः - डॉ. गोपीनाथमहापात्रः, नालन्दा, कटक (ओडिशा), २०१०।

8.संस्कृतसाहित्यस्य इतिहासः - डॉ. एच्. के. सतपथी, किताबमहल्, कटक, २०१५।